# Dhumravarna Stuti by Ahamasura

# ધૂમ્રવર્ણસ્તુતિઃ અહમસુરેણ પ્રોક્તા

## Document Information

Text title : Dhumravarna Stuti by Ahamasura

File name : dhUmravarNastutiHahamasureNaproktA.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Ajit Krishnan

Proofread by : Ajit Krishnan, PSA Easwaran

Description/comments : Mudgalapurana, Khanda 8, Adhyaya 7

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# ધૂમ્રવર્ણસ્તુતિઃ અહમસુરેણ પ્રોક્તા

ધૂમ્રવર્ણસ્તુ તુરેણ
ગતં પાશં વિલોક્યૈવાહઙ્કારો ગુરુણા યુતઃ ।
ધૂમ્રવર્ણં જગામાઽસૌ તં દૃષ્ટ્વા પ્રણનામ હ ॥ ૧૨॥

પુનરુત્થાય વિઘ્નેશં પૂજયામાસ ભક્તિતઃ ।
પુનઃ પ્રણમ્ય સર્વેશં તુષ્ટાવ સ કૃતાઞ્જલિઃ ॥ ૧૩॥

અહમુવાચ -
ધૂમ્રવર્ણાય વૈ તુભ્યં ગણેશાય પરાત્મને ।
અવ્યકાયાદિબીજાય પરેશાય નમો નમઃ ॥ ૧૪॥

લમ્બોદરાય દેવાય દૈત્યનાથાય તે નમઃ ।
હેરમ્બાય મહેશાનાં બાલકાય નમો નમઃ ॥ ૧૫॥

કર્મણે કર્મરૂપાય નાનાકર્મપ્રચારિણે ।
જ્ઞાનાય જ્ઞાનદાત્રે તે જ્ઞાનજ્ઞાનાય વૈ નમઃ ॥ ૧૬॥

ચરાય ચરરૂપાય જઙ્ગમસ્થાય તે નમઃ ।
સ્થાવરાય સદા તદ્રૂપાય તદ્રૂપધારિણે ॥ ૧૭॥

સ્થાવરજઙ્ગમાભ્યાં ચ હીનાય તે નમો નમઃ ।
યોગાય યોગનાથાય યોગિને યોગદાયિને ॥ ૧૮॥

યોગેભ્યો યોગદાત્રે તે નમશ્ચિન્તામણે નમઃ ।
શાન્તાય શાન્તચિત્તૈસ્તુ પ્રાપ્યાય શાન્ત મૂર્યતે ॥ ૧૯॥

બ્રહ્મણાં પતયે તુભ્યં બ્રહ્મણે સિદ્ધિબુદ્ધિદ! ।
સિદ્ધિનાથાય બુદ્ધીશ! તયોર્યોગાય તે નમઃ ॥ ૨૦॥

મૂષકોપરિ સંસ્થાય મૂષકધ્વજધારિણે ।
ચતુર્ભુજાય સ્વાનન્દપતયે તે નમો નમઃ ॥ ૨૧॥

કિં સ્તૌમિ ત્વાં ગણાધીશ! ધૂમ્રવર્ણસ્વરૂપિણમ્ ।
અવ્યક્તં વેદવાદેષુ કથિતં સતતં પ્રભો! ॥ ૨૨॥

સ્વરૂપં તે કથયિતું વેદા ધૂમ્રાયિતા બભુઃ ।
યોગશાન્તિધરાસ્તે કથયિતું ધ્રુવં અક્ષમાઃ ॥ ૨૩॥

અતસ્ત્વાં ધૂમ્રવર્ણાખ્યં વદન્તે વેદવાદિનઃ ।
પશ્યામિ તં ધૂમ્રવર્ણ એવાઽહં યોગિદુર્લભમ્ ॥ ૨૪॥

ધન્યોઽહં સકુલો નાથ! ત્વદઙ્ગિયુગદર્શનાત્ ।
ધૂમ્રવર્ણ ઉવાચ -
ત્વયા કૃતં ઇદં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
મમ ભક્તિપ્રદં ચૈવ ભવિષ્યતિ ન સંશયઃ ॥ ૨૮॥

શ ૃણુયાદ્યઃ પઠેદેતત્તસ્યાહઙ્કારજં ભયમ્ ।
ન ભસિષ્યતિ દૈત્યેશ ભુક્તિમુક્તિપ્રદં ભવેત્ ॥ ૨૯॥

યદ્યદિચ્છતિ તત્તચ્ચ દાસ્યામિ સ્તોત્રપાઠતઃ ।
મમ પ્રિયો ભવેત્ સોઽપિ સદા મોહવિવર્જિતઃ ॥ ૩૦॥

ઇતિ અહમસુરેણપ્રોક્તા ધૂમ્રવર્ણસ્તુતિઃ સમાપ્તા । ૮.૭

Encoded by Ajit Krishnan
Proofread by Ajit Krishnan, PSA Easwaran

---

*Dhumravarna Stuti by Ahamasura*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*